# Shri Chidambarapanchakshara Stava

# શ્રી ચિદમ્બરપઞ્ચાક્ષરસ્તવઃ

## Document Information

Text title : Shri Chidambarapanchakshara Stava

File name : chidambarapanchAkSharastavaH.itx

Category : shiva

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# શ્રી ચિદમ્બરપઞ્ચાક્ષરસ્તવઃ

શ્રીગણેશાય નમઃ ।
શ્રીચિત્સભેશાય નમઃ ।
ૐ હ્રીં શ્રીં નમઃ શિવાય ।
શ્રીસ્કન્દઃ
ઓઙ્કારાર્ણવભાસમાનવપુષં ઓઙ્કારવાચ્યં વિભું
    ઓતપ્રોતજગચ્ચરાચરતનું ઓજસ્વિદૂરઙ્ગમમ્ ।
ઓડ્યાણાભિધપીઠિકાન્તરલસદ્દેવીસનાથં શિવં
    ઓજોનાયકમણ્ડલસ્થમુડુરાટ્ચૂડં નટેશં ભજે ॥ ૧॥

હ્રીમ્મૂર્ત્યા શિવયા વિરાણમયમહીહૃત્પઙ્કજસ્થં સદા
    હ્રીણાનાં શિવકીર્તને હિતકરં હેલાહૃદાં માનિનામ્ ।
હ્રીબેરાદિસુગન્ધવસ્તુરુચિરં હેમાદ્રિબાણાસનં
    હ્રીઙ્કારાઙ્કિતપાદપીઠમતુલં હૃદ્યં નટેશં ભજે ॥ ૨॥

શ્રીમદ્જ્ઞાનસભાન્તરે પ્રવિલસચ્છ્રીપઞ્ચવર્ણાકૃતિં
    શ્રીવાણીવિનુતાઙ્ઘ્રિપઙ્કજયુગં શ્રીવલ્લભેનાર્ચિતમ્ ।
શ્રીવિદ્યામનુમોદિતં શ્રિતજનશ્રીદાયકં શ્રીધરં
    શ્રીચક્રાન્તરવાસિનં શિવમહં શ્રીમન્નટેશં ભજે ॥ ૩॥

નવ્યામ્ભોજમુખં નમજ્જલનિધિં નારાયણેનાર્ચિતં
    નાકૌકોનગરીનદીવિલસિતં નાગાજિનાલઙ્કૃતમ્ ।
નાનારૂપકનર્તનાદિચતુરં નાલીકજાન્વેષિતં
    નાદાત્માનમહં નગેન્દ્રતનયાનાથં નટેશં ભજે ॥ ૪॥

મધ્યસ્થં મધુવૈરિમાર્ગિતપદં મદ્વંશનાથં પ્રભું
    મારારાતિમતીવ મઞ્જુવપુષં મન્દારગૌરપ્રભમ્ ।
માયાતીતમશેષમઙ્ગલનિધિં મદ્ભાવનાભાવિતં
    મધ્યે વ્યોમસભં લસન્તમખિલં માન્યં નટેશં ભજે ॥ ૫॥

શિષ્ટૈઃપૂજિતપાદુકં શિવકરં શીતાંશુરેખાધરં
    શિલ્પં ભક્તજનાવને શિથિલિતાઘૌઘં શિવાયાઃપ્રિયમ્ ।
શિક્ષાકારણમમ્બુજાસનશિરોભૂષં સુશીલં પ્રભું
    શીતાપાઙ્ગવિલોકનં શિવકરં શ્રીમન્નટેશં ભજે ॥ ૬॥

વાણીવલ્લભવન્દ્યવૈભવયુતં વન્દારુચિન્તામણિં
    વાતાશાધિપભૂષણં વરકૃપાવારાન્નિધિં યોગિનામ્ ।
વાઞ્છાપૂર્તિકરં વલારિવિનુતં વાહીકૃતામ્નાયકં
    વામાઙ્ગાપ્તવરાઙ્ગનં વરકૃપાવાસં નટેશં ભજે ॥ ૭॥

યક્ષાધીશસખં યમપ્રમથનં યામિન્યધીશાનનં
    યજ્ઞાધ્વંસકરં યતીન્દ્રવિનુતં યજ્ઞક્રિયાધીશ્વરમ્ ।
યાજ્યં યાજકરૂપિણં યમધનૈર્યત્નોપલભ્યાઙ્ઘ્રિકં
    યાનીભૂતવૃષં યદૂદ્ભવનુતં દેવં નટેશં ભજે ॥ ૮॥

શ્રીમાયાવિલસચ્ચિદમ્બરમહાપઞ્ચાક્ષરૈરઙ્કિતાન્
    શ્લોકાન્ યેઽનુદિનં પઠન્તિ નિતરાં ચિન્તામણીનામકાન્ ।
તેષાં ભાગ્યવિશેષમાયુરધિકં વિદ્યા વરાન્ સત્સુતાન્
    સર્વાભીષ્ટમસૌ દદાતિ સહસા શ્રીચિત્સભાધીશ્વરઃ ॥ ૯॥

ઇતિ શિવરહસ્યાન્તર્ગતઃ શ્રીચિદમ્બરપઞ્ચાક્ષરસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Aruna Narayanan

*Shri Chidambarapanchakshara Stava*

pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*